लिके शिल्पिकुलप्रधाने पु० भरतः। कुले भवः यत् कुल्य ख। कुलीन, ढकञ्। कौलेयक कुलोद्भवे त्रि० अश्वादि० चतुरर्थ्यां यः। कुल्य कुलसन्निकृष्टदेशादौ त्रि० बलादि० देशे मतुप् मस्य वः। कुलवत् कुलयुक्ते त्रि० स्त्रियां ङीप् कुलवती तत्र सजातीयसंघे “यस्याश्चलद्वारिधिवारिवीचिच्छटोच्छलच्छङ्खकुलाकुलेन” माघः अलिकुलसङ्कुलेत्यादि जयदेवः पृथिव्याधारे मूलाधारे लीयते—ली+ड। ११कुलकुण्डल्यां स्त्री उपचारात् तदुपासके तन्त्रोक्ते १२आचारविशेषयुक्ते कुलाचाराधिकारेणैव कुलचन्द्रिका कुलक्रमदीपिका कुलचूडामणिकुलार्णवादयवस्तन्त्रग्रन्थाः १३भूमिलग्ने च त्रि०। १४तन्त्रोक्ते तिथिनक्षत्रवारभेदे त्रि० कुलतिथिकुलनक्षत्रकुलवारशब्दे कुलाचारशब्दे च विवृतिः।

कुलक न० कुल—क कौ लीयते ली—ड वा ततः संज्ञायां कन्। १पटोललतायां २परस्परसंबद्धश्लोकपञ्चके च मेदि० “कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्” सा० द०। ३काकेन्दौ पु० अमरः ४वल्मीके पु० ५कुलश्रेष्ठे त्रि० मेदि० ६मरुवकवृक्षे पु० रत्नमा०। ७हरितसर्पे पुंस्त्री० राजनि०। ८कुपीलौ पु० भावप्र०। ९शिल्पिकुलप्रधाने त्रि० भरतः।

कुलकर्कटी स्त्री नित्यकर्म्म०। चीनकर्क्यां राजनि०।

कुलकुण्डलिनी स्त्री कौ पृथिवीतत्त्वाधारे मूलाधारे लीयते ली—ड कर्म्म०। तन्त्रोक्ते मूलाधारे सर्पीवदवस्थिते शिवशक्तिभेदे कुलकुण्डलीत्यप्यत्र स्त्री। तत्स्वरूपादिकं शारदायामुक्तम् यथा “ततश्चैतन्यरूपा सा सर्व्वगा विश्वरूपिणी। शिवसन्निधिमासाद्य नित्यानन्दगुणोदया। दिक्कालाद्यनवच्छिन्ना सर्व्ववेदार्थगा शुभा। परापरविभागेन परशक्तिरियं स्मृता। योगिनां हृदयाम्भोजे नृत्यन्ती नित्यमञ्जसा। आधारे सर्व्वभूतानां स्फुरन्ती विद्युदाकृतिः। शङ्खावर्त्तक्रमाद्देवी सर्व्वमावृत्य तिष्ठति। कुण्डलीभूतसर्पाणामङ्गश्रियमुपेयुषी। गुणिता सर्व्वगात्रेषु कुण्डली परदेवता। विश्वात्मना प्रबुद्धा सा सूते मन्त्रमयं जगत्। सर्व्वदेवमयी देवी सर्व्वमन्त्रमयी शिवा। सर्वतत्त्वमयी साक्षात् सूक्ष्मा सूक्ष्मतरा विभुः। त्रिधामजननी देवी सोमसूर्य्याग्निरूपिणी। त्रिभेदतेजसां कर्त्री शब्दब्रह्मस्वरूपिणी। द्विचत्वारिंशद्वर्णात्मा पञ्चाशद्वर्णरूपिणी”। विवृतमेतत् पदार्थादर्शे राघवभट्टेन यथा “कुण्डलिनीतदुत्पत्तिमाह ततश्चैतन्येति। तदुक्तं “मूलाधारात् प्रथममुदितोयस्तु शब्दः पराख्यः पश्चात् पश्यन्त्यथ हृदयगोबुद्धियुङ् मध्यमाख्यः। वक्त्रे वैखर्य्यथ रुरुदिषोरस्य जन्तोः सुषुम्णाबद्धस्तस्माद्भवति पवनप्रेरितोवर्णसंघः”। ततः शरीरोत्पत्त्यनन्तरं चैतन्यरूपा अतएव शब्दब्रह्ममयी सा देवी कुण्डली परदेवता सर्वगात्रेण गुणिता अतएव विश्वात्मना सर्वात्मना प्रबुद्धा जातप्रबोधा मन्त्रमयं जगत् सूत इति दूरेण सम्बन्धः। तत्र मूलाधारे कुण्डलीभूतसर्पवन्नाडीवर्त्तते तन्मध्ये वायुवशादस्याः सङ्करणमेव गुणनम्। चैतन्यरूपेति स्वरूपाख्यानं सा प्रसिद्धा सर्वमावृत्य तिष्ठतीत्यनेन कर्त्तृव्याप्तिर्दर्शिता विश्वरूपिणीत्यनेन विषयव्याप्तिः। शिवसन्निधिमासाद्य स्थितेति शेषः अनेन शैवसिद्धान्ते शक्तिशब्दवाच्येयमित्युक्तं सन्निधिशब्दोऽप्यौपचारिकः तन्मते शिवशक्त्योरभेदात् तदुक्तमभिनवगुप्तपादाचार्य्यैः “शक्तेश्च शक्तिमद्रूपाद्व्यतिरेकं न वाञ्छति। तादात्म्यमनयोर्नित्यं वह्निदहनयोरिव”। यद्वा सम्पत्स्वङ्निधिस्वरूपं शिवस्वरूपं प्राप्येत्यर्थः वक्ष्यति च “पिण्डम्भवेत् कुण्डलिनी शिवात्मेति” गुणानां सत्वरजस्तमसामुदयोयस्याः सा नित्यानन्दा चासौ गुणोदया च सा नित्यानन्दगुणोदया तेन कुण्डलिनीस्वरूपमुक्तं गुणोदयेत्यनेन साङ्ख्यमते प्रकृतिवाच्येयमित्युक्तं यदाहुः “प्रधानमिति यामाहुर्यां शक्तिरिति कथ्यते” इति इदानीमध्यात्माधिभूताधिदैवादिविषयादिज्योतिषक्रमेण तस्या व्याप्तिमाह दिक्कालेति सर्व्वदेहानुगेति देहव्याप्तिः परापरविभागेन काचन परा शक्तिः काचनापरा तद्विभागेनापीयं परशक्तिरेव यदाहुः “भूमिरापोऽनलोवायुः खं मनोबुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् जीवभूतां महावाहो। ययेदं धार्य्यते जगत्” (गीता)। यद्वा परः स्थूलः अपरः महास्थूलः महदादिः तद्विभागेन परशक्तिः स्थूला शक्तिः स्थूलात्स्थूलेत्युक्तेः। अनेन महदादिव्याप्तिः यद्वा सर्व्वदेहानुगेत्यनेन प्राकृतशब्दतोर्थतश्च पुंस्त्रीनपुंसकलिङ्गव्याप्तिर्द्दर्शिता शब्दतो यथा शिव इत्युच्यते कुण्डलिनीत्युच्यते प्रधानमिति एवंभूतापि सा स्त्रीत्वेनैव निर्द्दिश्यत इत्याह परापरेति परा पुंप्रकृतिः अपरं नपुंसकप्रकृतिस्तद्विभागेन इयं परशक्तिःस्मृता अयमर्थः यद्यपि लिङ्गत्रयवाच्या तथापि तूर्णमेवाचलभक्तिभारपरिश्रान्तभक्तजनसमस्ताकाङ्क्षाकल्पवल्ली परशक्तिपदवाच्येति। अत एव शुभा रमणीया यदाहुराचार्य्याः” पुंनपुंसकयोस्तुल्याप्यङ्गनायां वि-